# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ९९

प्रभातायां तु शर्वर्यां पृथुवक्षा महायशाः ।
रामः कमलपत्राक्षः पुरोधसमथाब्रवीत् ॥ १॥

अग्निहोत्रं व्रजत्वग्रे सर्पिर्ज्वलितपावकम् ।
वाजपेयातपत्रं च शोभयानं महापथम् ॥ २॥

ततो वसिष्ठस्तेजस्वी सर्वं निरवशेषतः ।
चकार विधिवद्धर्म्यं महाप्रास्थानिकं विधिम् ॥ ३॥

ततः क्षौमाम्बरधरो ब्रह्म चावर्तयन्परम् ।
कुशान्गृहीत्वा पाणिभ्यां प्रसज्य प्रययावथ ॥ ४॥

अव्याहरन्क्व चित्किं चिन्निश्चेष्टो निःसुखः पथि ।
निर्जगाम गृहात्तस्माद्दीप्यमानो यथांशुमान् ॥ ५॥

रामस्य पार्श्वे सव्ये तु पद्मा श्रीः सुसमाहिता ।
दक्षिणे ह्रीर्विशालाक्षी व्यवसायस्तथाग्रतः ॥ ६॥

शरा नानाविधाश्चापि धनुरायतविग्रहम् ।
अनुव्रजन्ति काकुत्स्थं सर्वे पुरुषविग्रहाः ॥ ७॥

वेदा ब्राह्मणरूपेण सावित्री सर्वरक्षिणी ।
ओङ्कारोऽथ वषट्कारः सर्वे राममनुव्रताः ॥ ८॥

ऋषयश्च महात्मानः सर्व एव महीसुराः ।
अन्वगच्छन्त काकुत्स्थं स्वर्गद्वारमुपागतम् ॥ ९॥

तं यान्तमनुयान्ति स्म अन्तःपुरचराः स्त्रियः ।
सवृद्धबालदासीकाः सवर्षवरकिङ्कराः ॥ १०॥

सान्तःपुरश्च भरतः शत्रुघ्नसहितो ययौ ।
रामव्रतमुपागम्य राघवं समनुव्रताः ॥ ११॥

ततो विप्रा महात्मानः साग्निहोत्राः समाहिताः ।
सपुत्रदाराः काकुत्स्थमन्वगच्छन्महामतिम् ॥ १२॥

मन्त्रिणो भृत्यवर्गाश्च सपुत्राः सहबान्धवाः ।
सानुगा राघवं सर्वे अन्वगच्छन्प्रहृष्टवत् ॥ १३॥

ततः सर्वाः प्रकृतयो हृष्टपुष्टजनावृताः ।
अनुजग्मुः प्रगच्छन्तं राघवं गुणरञ्जिताः ॥ १४॥

स्नातं प्रमुदितं सर्वं हृष्टपुष्पमनुत्तमम् ।
दृप्तं किलिकिलाशब्दैः सर्वं राममनुव्रतम् ॥ १५॥

न तत्र कश्चिद्दीनोऽभूद्व्रीडितो वापि दुःखितः ।
हृष्टं प्रमुदितं सर्वं बभूव परमाद्भुतम् ॥ १६॥

द्रष्टुकामोऽथ निर्याणं राज्ञो जानपदो जनः ।
सम्प्राप्तः सोऽपि दृष्ट्वैव सह सर्वैरनुव्रतः ॥ १७॥

ऋक्षवानररक्षांसि जनाश्च पुरवासिनः ।
अगच्छन्परया भक्त्या पृष्ठतः सुसमाहिताः ॥ १८॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com